# Ganeshakrita Shiva Stuti

# गणेशकृता शिवस्तुतिः

## Document Information

Text title : Ganeshakrita Shiva Stuti

File name : shivastutiHgaNeshakRRitA.itx

Category : shiva, shivarahasya, stuti

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | mAheshvarAkhyaH prathamAMshaH | adhyAyaH 24 - kailAsavarNane gaNeshakRitastutiH | 29-36||

Latest update : December 17, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 17, 2023

*sanskritdocuments.org*

# गणेशकृता शिवस्तुतिः

गणेशः -
गणेश त्रिगुणातीत भगणाधीशमस्तक ।
गर्जन्मेघगणोद्भूततटिद्गणजटामल ॥ २९॥

व्योमकेश भगवन् श्रुतिमौलिस्तोमसामविनुताखिलसोम ।
भूमभौममहिमागमकाम धूमधामबहुलद्युतिकण्ठ ॥ ३०॥

क्षयद्वीरमारापहाराद्य शम्भो वीर धीर सुरशेखरपाद ।
घोरान्धकासुरनिबर्हण कालकाल क्रूरान्तर त्रिपुरगर्वहराव्ययेश ॥ ३१॥

दहरगहनशेखरोऽसि शम्भो निरवद्याखिललोकसौख्य भूमन् ।
त्रिगुणगतिविदूर दर्शिताद्य प्रकटितवेदवचोभिरीड्यपाद ॥ ३२॥

करे कुरङ्गं स्वकपर्दगङ्गं हारे भुजङ्गं यमिहृत्सुसङ्गम् ।
बालाकृताङ्गं सितभस्मसङ्गमनङ्गमातङ्गहरं भजामि ॥ ३३॥

- -

स्कन्दः -
इति स्तौति सदा शम्भुं कैलासेशगणेश्वरः ।
गणनाथो गणवृतस्सदाशिवगणाग्रणीः ॥ ३४॥

तत्पाति गोपुरं शम्भोर्मणिप्राकारमप्यसौ ।
स्वकीयैर्गणपैस्सार्धं चन्द्रचूडस्यशासनात् ॥ ३५॥

हरिन्मणिकृतं वरं हरितगोपुरं पश्चिमे
विराजिततलाङ्कणैर्वृषललामशृङ्गप्रभैः ।
गरुन्मणिवरप्रभं विततरत्नसौधोत्तमं
वरप्रवरसुन्दरप्रकटवप्रकारकम् ॥ ३६॥

स्वबाहुबलमाश्रितो द्विरदवक्त्रजैस्सद्गणैः
प्रपाति (प्रयातीति) गणनायकश्शिवपदाब्जसंसेवकः ॥ ३७॥

॥ इति शिवरहस्यान्तर्गते माहेश्वराख्ये गणेशकृता शिवस्तुतिः ॥

- ॥ श्रीशिवरहस्यम् । माहेश्वराख्यः प्रथमांशः । अध्यायः २४ - कैलासवर्णने गणेशकृतस्तुतिः । २९-३६ ॥

- .. shrIshivarahasyam . mAheshvarAkhyaH prathamAMshaH . adhyAyaH 24 - kailAsavarNane gaNeshakRRitastutiH . 29-36..

Notes:

Skanda स्कन्द narrates eulogy to Śiva शिव by Gaṇeśa गणेश, while describing about Gaṇeśa's residence towards the Western region of Mount Kailāsa कैलास शैल, that has predominance of Emerald - viz. Harinmaṇi हरिन्मणि / Marakatamaṇi मरकतमणि / Garutmatmaṇi गरुत्मत्मणि.

Encoded and proofread by Ruma Dewan

---

*Ganeshakrita Shiva Stuti*

pdf was typeset on December 17, 2023

Please send corrections to *sanskrit@cheerful.com*